श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीगोविन्दराज सुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीगोविन्दराज सुप्रभातम् ॥

श्रीभूमिनायक दयापर दिव्यमूर्ते
देवादिदेव जगदेकशरण्य विष्णो।
गोपाङ्गनाकुचतटेषु निमग्नदृष्टे
गोविन्दराज विजयिन् तव सुप्रभातम् ॥ 1 ॥

देवादिदेव फणिराजविहङ्गराज -
राजत्किरीटमणिराजविराजिताङ्घ्रे।
राजाधिराज वसुदेवकुलाधिराज
गोविन्दराज विजयिन् तव सुप्रभातम् ॥ 2 ॥

कासारयोगिपरमाद्भुतभक्तिबद्ध -
वाङ्मूलभूषितमहोत्पलरम्यपाद।
गोपाधिनाथ वसुदेवकुमार कृष्ण
गोविन्दराज विजयिन् तव सुप्रभातम् ॥ 3 ॥

श्रीभूतयोगिपरिकल्पितदिव्यमान -
ज्ञानप्रदीपपरिदृश्यरतैकतान।
गोगोपजालपरिरक्षणबद्धदीक्ष
गोविन्दराज विजयिन् तव सुप्रभातम् ॥ 4 ॥

मान्यानुभावमहदाह्वययोगिदृष्टे
श्रीशङ्खचक्रकमलासहितामलाङ्ग।
गोपीजनप्रियचरित्र विचित्रवेष
गोविन्दराज विजयिन् तव सुप्रभातम् ॥ 5 ॥

श्रीमत्त्वदीयपदपङ्कजभक्तिनिष्ठ -
श्रीभक्तिसारमुनिनिश्चितमुख्यतत्त्व।
गोपीजनार्तिहर गोपजनान्तरङ्ग
गोविन्दराज विजयिन् तव सुप्रभातम्॥ **6** ॥

श्रीमत्पराङ्कुशमुनीन्द्रसहस्रशाख -
संस्तूयमानचरणाम्बुज सर्वशेषिन्।
गोपालवंशतिलकाच्युतपादपद्म
गोविन्दराज विजयिन् तव सुप्रभातम्॥ **7** ॥

शेषाचले महति पादपपक्षिजन्म
तद्भक्तितः स्पृहयता कुलशेखरेण।
राज्ञा पुनःपुनरुपासितपादपद्म
गोविन्दराज विजयिन् तव सुप्रभातम्॥ **8** ॥

श्रीविष्णुचित्तकृतमङ्गलदिव्यसूक्ते
तन्मानसाम्बुरुहकल्पितनित्यवास।
गोपालबालयुवतीविटसार्वभौम
गोविन्दराज विजयिन् तव सुप्रभातम्॥ **9** ॥

श्रीविष्णुचित्तकुलनन्दनकल्पवल्ली -
गोदालकान्तविनिवेशितमाल्यलोल।
गोपाङ्गनाकुचकुलाचलमध्यसुप्त
गोविन्दराज विजयिन् तव सुप्रभातम्॥ **10** ॥

भक्ताङ्घ्रिरेणुमुनिना परमत्वदीय -
शेषत्वमाश्रितवता विमलेन नित्यम्।
प्राबोधकीस्तुतिकृता ह्यवबोधितश्रीः।
गोविन्दराज विजयिन् तव सुप्रभातम्॥ **11** ॥

श्रीपाणनामकमहामुनिदिव्यनाम -
दिव्यानुभावदयमानदृगञ्चलाख्य।
पूर्णानुकम्प पुरुषोत्तम पुष्कराक्ष
गोविन्दराज विजयिन् तव सुप्रभातम्॥ 12॥

भक्तोत्तमाय परकालमुनीन्द्रनाम्ने
विश्राणितातुलमहातनुमूलमन्त्र।
सर्वात्मरक्षणविचक्षण चक्रपाणे
गोविन्दराज विजयिन् तव सुप्रभातम्॥ 13॥

सत्त्वोत्तरैः सततसेव्यपदाम्बुजेन
संसारतारकदयार्द्रदृगञ्चलेन।
सौम्योपयन्तृमुनिमानसराजहंस
गोविन्दराज विजयिन् तव सुप्रभातम्॥ 14॥

भक्तप्रपन्नकुलनायकभाष्यकार -
सङ्कल्पकल्पतरुदिव्यफलामलात्मन्।
श्रीशेषशैलनिकटस्थितशेषशायिन्
गोविन्दराज विजयिन् तव सुप्रभातम्॥ 15॥

श्रीमच्छठारिकरुणाश्रितदेवगान -
सारज्ञनाथमुनिसन्नुतपुण्यमूर्ते।
गोब्राह्मणप्रियगुरो श्रितपारिजात
गोविन्दराज विजयिन् तव सुप्रभातम्॥ 16॥

देव प्रसिद्ध करुणाकर भक्तवर्ग -
सेनापतिप्रणयिताखिललोकभानो।
श्रीवासदिव्यनगराधिप राजराज
गोविन्दराज विजयिन् तव सुप्रभातम्॥ 17॥

॥ इति श्रीगोविन्दराज सुप्रभातं समाप्तम् ॥